प्रगल्भः । इति हेमचन्द्रः । ६ । १३१ ॥ (यथा, रघुः । ६ । ५८ ।

"चावातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढ़प्रिया नयनविभ्रमचेष्टितानि ॥")

निपुणः । इति राजनिर्घण्टः ॥ (यथा, भागवते । ३ । २ । ६ ।
"इङ्गितज्ञाः पुरुप्रौढ़ा एकारामाश्च सात्वताः ॥")
प्रकर्षेण ऊढ़श्च ॥

प्रौढ़पादः, पुं, (प्रौढ़ः पादो यस्य ।) आसनारोपितपादतलः । आसनोपरिपादतलद्वयसंयोगपूर्ब्बकोपवेष्टा । वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । वस्त्रादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्ब्बकोपवेष्टा । यथा,—

"आसनारूढ़पादस्तु जान्वोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥
स्नानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥"
इति कात्यायनः ॥ * ॥

अनेकोत्ताल्ये दारुशिले भूमिसमे इष्टकाश्च संकीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात् । इत्याह्निकतत्त्वम् ॥

प्रौढ़ा, स्त्री, (प्रौढ़ + टाप् ।) नायिकाभेदः । तत्पर्य्यायः । चिरिण्टी २ सुवयाः ३ श्यामा ४ दृढरजाः ५ । इति राजनिर्घण्टः ॥ यथा,—

"बाला तु तरुणी प्रौढ़ा वृद्धा भवति नायिका ।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा ॥"

त्रिंशद्वर्षादूर्द्धं पञ्चपञ्चाशद्वर्षपर्य्यन्तं प्रौढ़ावस्था । यथा,—

"आषोड़शी भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशता प्रौढ़ा भवेद्वृद्धा ततः परम् ॥"

अस्या वशीकरणं यथा,—

"अलङ्कारादिभिर्ब्बाला तरुणी रतियोगतः ।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात् ॥"

तस्या रमणे दोषो यथा,—

"बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणदा भवेत् ॥"
इति रतिमञ्जरी ॥

मुग्धादित्रिविधान्तर्गतप्रगल्भा नायिका । तत्र प्रौढ़ा खण्डिता यथा,—

"भालवीक्ष्य विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकेराजिप्राननमानमीलितमुखी चित्रार्पितेवाभवत् ।
रूक्षं नोक्तवती न वा क्षतवती निश्वासकोष्णादृशः
प्रातर्मङ्गलमङ्गला करतलादादर्शमादर्शयत् ॥"

प्रौढ़ा कलहान्तरिता यथा,—

"अकरोः किमु नेत्रशोणिमानं
किमकार्षीः करपल्लवे निरोधम् ।
कलहं किमधाः क्रुधा रसज्ञे
हितमर्थं न विदन्ति दैवदुष्टाः ॥"

प्रौढ़ा उत्कण्ठिता यथा,—

"आर्त्तानि कुञ्जवणिपूथिरवालबन्धो
मातङ्गमखिनि पितङ्गिमिर प्रवीर ।
पृच्छामि किञ्च नवनीरधराभिरामो
दामोदरः कथय किं न समाजगाम ॥"

प्रौढ़ा वासकसज्जा यथा,—

"न्यस्तं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहलिघा
स्मरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम् ॥"

प्रौढ़ाभिसारिका यथा,—

"स्फुरदुरसिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन ।
अथ कथय कथं सहेत गन्तुं
यदि न निशासु मनोरथो रथः स्यात् ॥"

प्रौढ़ा प्रवत्स्यत्पतिका यथा,—

"नायं मुञ्चति सुभ्रुवामपि तनुत्यागे वियोगज्वरक्लेशार्हं विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद ।
ताम्बूलं कुसुमं पटीरमुदकं यद्बन्धुभिर्दीयते
तत् स्वादञ्च परत्र वा किमु विषज्वालावलीदुःसहम् ॥"
इति रसमञ्जरी ॥

अन्यत् प्रगल्भाशब्दे द्रष्टव्यम् ॥

प्रौढ़िः, स्त्री, (प्र + वह + क्तिन् । प्रादूहेति वृद्धिः ।) सामर्थ्यम् । इति मुग्धबोधव्याकरणम् ॥ तत्पर्य्यायः । उत्साहः २ प्रगल्भता ३ अभियोगः ४ उद्यमः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९ । इति हेमचन्द्रः । २ । २१४ ॥ (यथा, कथासरित्सागरे । १४ । ६३ ।

"यथा यथा च दम्पत्योः प्रौढ़िं परिचयो ययौ ।
तयोस्तथा तथा प्रेम नवीभावमिवाययौ ॥")

प्रौणः, त्रि, (प्र + ओण् अपनयने + अच् ।) निपुणः । इति केचित् ॥

प्रौष्ठपदः, पुं, (प्रोष्ठो गौस्तस्येव पादा यासामिति प्रोष्ठपदा नक्षत्रविशेषाः । तद्युक्ता पौर्णमासी । प्रोष्ठपद + "नक्षत्रेण युक्तः कालः ।" ४।२।३। इति अण् । ङीप् । प्रौष्ठपदी पौर्णमास्यस्मिन् । प्रौष्ठपदी + "साऽस्मिन् पौर्णमासीति ।" ४।२।२१। इति अण् ।) भाद्रमासः । इत्यमरः । १ ।३।२२॥ (यथा, महाभारते । १३ । १०६ । २८ ।

"प्रौष्ठपदन्तु यो मासमेकाहारो भवेन्नरः ।
धनाढ्यं स्फीतमचलमैश्वर्यं प्रतिपद्यते ॥"

प्रोष्ठपदासु भवे, त्रि । इति सिद्धान्तकौमुदी । ७ । ३ । १८ ॥)

प्रौहः, पुं, (प्र + ऊह + कः । प्रादूहेति वृद्धिः ।) प्रकर्षेणोहः । इति मुग्धबोधव्याकरणम् ।

प्लक्ष, च भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) चन्तःस्थतृतीययुक्तः । च, प्लक्षति प्लक्षते । इति दुर्गादासः ॥

प्लक्षः, पुं, (प्लक्ष्यते भक्ष्यते विहगादिभिरिति । प्लक्ष + कर्म्मणि घञ् ।) वृक्षविशेषः । पाकुड़ इति भाषा । तत्पर्य्यायः । जटी २ पर्क्कटी ३ । इत्यमरः ॥ पर्क्कटिः ४ प्लवा ५ शौधा ६ जटिः ७ । इति शब्दरत्नावली ॥ कपीतनः ८ चौरी ९ सुपार्श्वः १० कमण्डलुः ११ शृङ्गी १२ अवरोहशाखी १३ गर्द्दभाण्डः १४ कपीतकः १५ दृढ़प्ररोहः १६ प्लवकः १७ प्लवङ्गः १८ महाबलः १९ ॥ हृस्वप्लक्षपर्य्यायः । स्वल्पः २० सुशीतः २१ शीतवर्य्यकः २२ पुण्ड्रः २३ महावरोहः २४ हृस्वपर्णः २५ पिम्परिः २६ भिदुरः २७ मङ्गलच्छायः २८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । इति राजनिर्घण्टः ॥ व्रणयोनिमदाहपित्तकफशोथरक्तपित्तनाशित्वम् । पर्क्कटी च स्त्रियामपि । इति भावप्रकाशः ॥ कन्दरालवृक्षः । द्वीपभेदः । अश्वत्थवृक्षः । इति मेदिनी । षे, १७ ॥ पचकः । इति हेमचन्द्रः ॥

प्लक्षद्वीपः, पुं, (प्लक्षतरूपलक्षितो द्वीपः ।) सप्तद्वीपान्तर्गतद्वीपविशेषः । तस्य विवरणं यथा,

सूत उवाच ।

"जम्बुद्वीपस्य विस्ताराद्विगुणेन समन्ततः ।
संवेष्टयित्वा क्षारोदं प्लक्षद्वीपो व्यवस्थितः ॥
प्लक्षद्वीपे च विप्रेन्द्राः सप्तासन् कुलपर्व्वताः ।
ऋज्वायताः सुपर्व्वाणः सिद्धसङ्घनिषेविताः ॥
गोमेदः प्रथमस्तेषां द्वितीयश्चन्द्र उच्यते ।
नारदो दुन्दुभिश्चैव सोमश्च ऋषभस्तथा ॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणोऽत्यन्तवल्लभः ।
तत्र देवर्षिगन्धर्व्वैः सिद्धैश्च भगवानजः ॥
उपास्यते स विश्वात्मा साक्षी सर्व्वस्य विश्वसृक् ।
तेषु पुण्या जनपदा नाधयो व्याधयोऽपि च ॥
न तत्र पापकर्त्तारः पुरुषा वा कदाचन ।
तेषां नद्यः सप्त चैव वर्णानान्तु समुद्रगाः ॥
तासु ब्रह्मर्षयो नित्यं पितामहमुपासते ।
अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्रता ॥
अमृता सुकृता चैव नामतः परिकीर्त्तिताः ।
क्षुद्रनद्यस्त्वसंख्याताः सरांसि सुबहून्यपि ॥
न वै तेषु युगावस्थाः पुरुषा वै चिरायुषः ।
आर्य्यकाः कुरवाश्चैव विदशा भाविनस्तथा ॥
ब्रह्मक्षत्रियविट्शूद्रास्तस्मिन् द्वीपे प्रकीर्त्तिताः ।
इज्यते भगवान् सोमो वर्णैस्तत्र निवासिभिः ॥
तेषाञ्च सोमसायुज्यं सारूप्यं मुनिपुङ्गवाः ।
सर्व्वे धर्म्मपरा नित्यं नित्यं मुदितमानसाः ॥
पञ्चवर्षसहस्राणि जीवन्ति च निरामयाः ॥"

इति कौर्म्मे भुवनकोषे ४६ अध्यायः ॥ * ॥

अपि च "ऋषिरुवाच । अतःपरं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते । जम्बुद्वीपो यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन । लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन । प्लक्षो जम्बुप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः । तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम । शिवं वयसं सुभद्रं शान्तं क्षेम-